This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

Checked 2012

M-777

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M777. विषय पुरान.
नाव. लिंग प्रतिष्ठाविधी (mss) ✓.
लेखक/लिपीकार गोविंद शास्त्री आठे.
पृष्ठ 17 काळ — पूर्ण/~~अपूर्ण~~

M-777

॥ लिंगप्रतिष्ठाप्रारभ्यते ॥

श्रीगणेशाय नमः ॥ अथ बोधायनोक्तलिंगप्रतिष्ठा
विधिः ॥ तत्रादौ कालः ॥ विष्णुधर्मोत्तरे ॥ चैत्रे वा फा
ल्गुने वापि ज्येष्ठे वा माधवे तथा ॥ माघे वा सर्वदेवा
नां प्रतिष्ठा शुभदा सिते ॥ सा स्याद्रिक्तान्यतिथिषु वा
रे भौमान्यके तथा ॥ माधवो वैशाखः ॥ माघोत्र शिवा
दिप्रतिष्ठापरः ॥ विष्णुप्रतिष्ठा तु माघे न भवति ॥ मा
घे कर्तुर्विनाशः स्यात्फाल्गुने शुभदा सितेति विष्णुप्र

तिष्ठाप्रकरणे उक्तनिषेधात् ॥ इति हेमाद्रिः ॥ सिते शु
क्लपक्षे इति केचित् ॥ त्रिविक्रमस्तु ॥ कृष्णपक्षत्रिभागे तु
प्रथमे स्याच्छुभावहा ॥ मध्या द्वितीयभागे तु तृतीये क
र्तृनाशिनी ॥ शुक्ले त्रिभागे प्रथमे देशनाशाय कीर्ति
ता ॥ द्वितीये मध्यफलदा तृतीये तु शुभावहेति विष्णु
धर्मोत्तरासिते सनेन पुष्टचंद्रास्तिथय उच्यंते ॥ शु
क्लपक्ष इत्याह ॥ अथ नक्षत्राण्युच्यंते ॥ मात्स्ये ॥ आषाढ

लिं०
२

प्र०

द्रं तथा मूलउत्तरात्रयमेव च॥ ज्येष्ठाश्रवणरोहिण्यः पूर्वा
भाद्रपदा तथा॥ हस्तोश्विनी रेवती च पुष्यामृगशिरःस्त
था॥ अनुराधा तथा स्वाती प्रतिष्ठासु प्रशस्यते॥ नृसिं
हपुराणे॥ तथा महाश्वीनो मासउत्तमः सर्वकामदः॥
देवःस्तत्र सदा शक्रपांसु नासुप्रतिष्ठितः॥ स भवेत्फलदः
पुंसां कर्कस्थे च दिवाकरे॥ न तिथिर्न च नक्षत्रं नोप
वासोत्र कारणं॥ मातृभैरववाराहनारसिंहत्रिवि

२

क्रमाः॥ महिषासुरहंत्र्यश्च स्थाप्या वै दक्षिणायने॥ मा
तृभैरवइत्यत्र देवभैरवइत्यपि पाठो वर्तते॥ तत्र देव
शब्देन माहादेवः॥ भैरवपदसामानाधिकरणसात्
अथ प्रयोगः॥ चंद्रानुकूल्ये उक्तशुभतिथौ पूर्वेद्युः॥ पू
र्वाह्णे ब्राह्मणानाहूय तैः संकल्पादि कुर्यात्॥ तद्यु
था॥ दर्भासनेउपविश्य पवित्रपाणिः प्राणानायम्य दे
शकालौ संकीर्त्य॥ मम अस्यां मूर्तौ देवकलासान्निध्या

र्थं शाश्वतब्रह्मलोकप्राप्त्यर्थं सकलाभीष्टसिद्ध्यर्थं श्रीप
रमेश्वरप्रीत्यर्थं बौधायनोक्तप्रकारेण लिंगप्रतिष्ठां क
रिष्ये॥ अक्षय्यसुखकामो वेश्वरप्रीतिकामो वेति संक
ल्प्य॥ प्रासादपूर्वकलिंगस्थापने तु वास्तुशांतिपूर्वक
लिंगप्रतिष्ठाख्यं कर्म करिष्ये॥ तदंगं स्वस्तिपुण्याहवा
चनं मातृकापूजनं नांदीश्राद्धं आचार्यादिवरणं च क
रिष्ये॥ गणपतिपूजनं कृत्वा प्रवरोच्चारं कृत्वा आचा

र्यस्य प्रवरानुच्चार्य लिंगप्रतिष्ठाकर्मणि आचार्यत्वां वृणे
इति वृत्वा प्रार्थयेत्॥ आचार्यस्तु॥ मंत्रमूर्तिर्भवान्ना
थ संसारच्छेदकारक॥ यथापूर्वोहि देवस्य तथाकुरु
ष्वजगद्गुरो॥ संसारभयभीतेन अयं यज्ञः सुभचिंतितः॥ प्रा
रब्धस्त्वत्प्रसादेन निर्विघ्नं भवतु द्विजेति॥ एवं ब्रह्मसद
स्ययोर्वरणं कृत्वा॥ चत्वारोऽष्टौ षोडश वा ऋत्विजो वृणु
यात्॥ आचार्यः हस्तौ पादौ प्रक्षाल्याचम्य प्राणानायम्य

देशकालौस्मृत्वाअमुकयजमानेनवृतआचार्यकर्मक
रिष्ये॥इतिसंकल्प्य॥गौरसर्षपान्विकिरेत्॥यदत्र० गच्छतु॥
अपक्राम० प्रतिष्ठाकर्मसमारभेत्॥पंचगव्यंतत्तन्मंत्रेणै
कीकृत्यशुचीवो० तृचेनआपोहिष्ठेतिरुद्रोदकैस्त्रिप्रोक्ष न
येत्॥स्वस्त्ययनमितिमंत्रद्वयंपठित्वा॥देवाःआयांतुयातु
धानाअपयांतुइतिभूमौप्रादेशंकुर्यात्॥प्रासादे॥शंकु
रोपणादिब्रह्मादीनांस्थापनपूजनंबलिदानंसूत्रवेष्टनंदु

ग्धधारांजलधारांचकुर्यात्॥ततोनिशायांहिरण्यंपंच
गव्यंदूर्वांकुरयवाश्वत्थपलाशपर्णमिश्रोदकेनलिं
गमभिषिंचेत्॥आपोहिष्ठेतितिसृभिर्हिरण्यवर्णाइति
चतसृभिःपवमानःसुवर्जनइत्यनुवाकेनव्याहृति
भिश्च॥ततःपुष्पफलयवाक्षतदूर्वांकुरान्नमस्तेरुद्र
मन्यवइतिमंत्रेणपादपीठेनिक्षिप्य॥तत्रलिंगंस्थापयित्वा
रक्षोहणंवाजिनमितिप्रतिसरसूत्रंबध्वा॥शिवायनम

लिं०
५

इति मंत्रेण पंचोपचारैः संपूज्य॥ अहतेन वाससाऽऽच्छा
द्य॥ अवतेहेडो उत्तममिति द्वाभ्यां मंत्राभ्यां जलेऽधिवास
येत्॥ अथ द्वितीयेह्नि लिंगतो भद्रस्य प्रतिद्वारं कलशद्व
यं स्थापयित्वा॥ तत्र वरुणमावाह्य संपूज्य उत्तिष्ठ ब्रह्मणः
स्पत इति ऋत्विजो लिंगमुत्थापयेयुः॥ ततो बौध्यायनोक्तं
पुण्याहं वाचयित्वा॥ स्वागतं देवदेवेश विश्वरूप नमोस्तु
ते॥ शुद्धेपि त्वदधिष्ठाने शुद्धिं कुर्मः सदाशिव॥ इति प्रा

प्र०
५

र्थयित्वा॥ ततो वल्मीकवपामृत्कषायैश्चानुलिप्य॥ तुष्णिं शु
द्धोदकेन स्नापयेत्॥ ततः पंचगव्येन॥ नमस्ते रुद्र मन्यव
इत्यादि सद्दष्टो मृडयातिनइत्यंतैरष्टभिर्मंत्रैः स्नापयित्वा॥ त
तः शमीपलाशखदिरबिल्वाश्वत्थवैकंकतन्यग्रोधपनस
आम्रशिरीषउदुंबरप्लक्षाणां च कषायकलशोदकेनाभि
षिंचति॥ अश्वत्थे वो निषदनं० पूरुषमिति मुक्ताप्रवालोदकं
सुवर्णोदकेन लिंगमभिषिच्य॥ हिरण्यवर्णाः शुचयः पाव

काइतिचतसृभिःपवमानःसुवर्जनइत्यनुवाकेनव्याहृ
तिभिश्चपूर्वस्थापितकलशचतुष्टयेनाभिषिंचति॥अग्निः
सप्तिमितिलोहटंकोच्चारणार्थेकेचिदाहुः॥लिंगंपीठात
रेनिवेश्य॥युवंवस्त्राणीतिवस्त्रयुग्मेनावेष्ट्यनाममंत्रेण
गंधादिभिःपूजइत्वा॥आदौबलिंप्रदर्श्य॥आचार्यः॥हिर
ण्यगर्भःसमवर्त्ततांग्रेतिअष्टभिर्मंत्रैरष्टौदीपान्प्रदर्श्यतान्
बलौस्थापइत्वा॥आदर्शंप्रदर्श्यतैजसपात्रेमध्वानीय॥

तन्मधुसुवर्णशलाकयागृहित्वास्वयंपार्श्वेस्थित्वा॥सत्
र्यचोषिणचित्रंदेवानामितिमंत्रावृत्याएकैकंनेत्रेसंमृ
ज्योन्मीलयेत्॥तदानकश्चित्पुरतःतिष्ठेत्॥आदर्शंभ
क्ष्यादिकंचयथासंभवंप्रदर्शयेत्॥ॐनमोभगवतेरुद्रा
यहिरण्यरेतसेपरायपरात्मनेविश्वरूपायउमाप्रीया
यनमइतिनेत्रंलिंगाकारंसंलिख्य॥अंजंतित्वामध्वरेदे॰
उपस्थेइतितत्रमध्वंजनंकुर्यात्॥नसमज्योन्मीलनेबाणर

न्नपर्वतलिंगेष्विति केचित्॥ततो यजमानेत्रीन्भीरुनांगत्वे
नआचार्याय धेनुं दद्यात्॥ततःउत्तिष्ठब्रह्मणस्पत इति देव
मुत्थाप्य॥कुशप्रस्तरे शुभवस्त्रेणाच्छाद्य प्राक्शिरसं देवं
शाययेत्॥प्राजापत्यो यं मुहूर्तो स्तु॥इति मंत्रेण॥ततःकुंडे
स्थंडिले वा स्वगृह्यविधिनाग्निंप्रतिष्ठाप्य ध्यात्वा॥ग्रहस्था
पनपक्षे ग्रहान्संस्थाप्य पूजयेत्॥अन्वाधानं कुर्यात्॥लिं
गप्रतिष्ठांगत्वेन होमे देवतापरिग्रहार्थं अन्वाधानं करिष्ये॥

अस्मिन्नन्वाहितेग्नाविसादिचक्षुषीआज्येनेत्रप्रधानं॥
ग्रहस्थापनपक्षेग्रहान्वाधानं कृत्वाअत्रप्रधानं॥श्रीरुद्रंया
यातइषुःशिवतमाइत्यादिअनुवाकांतं द्रापेअंधसस्पतेसह
स्राणिसहस्रशाइत्यनुवाकाभ्यांप्रतिमंत्रंचतुर्वारमाज्येनत
थाभवाद्यादेवताःप्रत्येकंतिलौदनेनतथाभवस्यदेवस्यप
त्न्याद्यष्टौदेवताःप्रत्येकंगुडौदनेनतथाभवस्यदेवस्यसुता
द्यष्टौप्रत्येकंहरिद्रौदनेनपुनःरुद्रंत्र्यंबकंमानोमहांतमा

नः स्तोके आराते गोघ्न विकिरिद सहस्राणि सहस्रशा इसं तेःष
उड्डिः शिवादि द्वादशदेवताश्च प्रसेकं मिश्रलिङ्गोदनादि चिड
विषा नामं मंत्रेण यक्ष्ये ॥ लिंगतो भद्रदेवताः नाममंत्रेण द्वाद
राति स्वाहुतिभिः एकैकयाज्याहुसा वारोषेण स्विष्टकृतमि
सादि सद्यो यक्ष्ये ॥ इसं तेस मिश्रक्षेपादि परिसमुह्य नादि आज्य
भांगांतं कृत्वा इदमुपकल्पितं द्रव्यमन्वाख्यानोक्तक्रमेणान्वा
ख्यान निर्दिष्टदेवताभ्यः प्रसेकं न मम यथादैवतमस्तु ॥ न ममेति ब

देत् ॥ आचार्यः ॥ अन्वाख्यानक्रमेण तेस्तेरनुवाकैः ईशा ॥ लिं
गमूलं स्पृशेत् ॥ सार्वोवै रुद्रः तस्मै रुद्राय नमो अस्तु ॥ पुरु
षो वै रुद्रः सन्महो नमो नम इति ॥ पुनः स्तैरनुवाकैः ईशा ॥
कद्रुद्राय इति मध्यं स्पृशेत् ॥ पुनः ईशान मो हिरण्यबाहवे० न
मो नमः ॥ इसग्रं स्पृशेत् ॥ पुनस्ताभिः ईशा संपूर्णेन नमकाध्या
येन सर्वांगं स्पृशेत् ॥ उद्धृत्य जातवेदसमित्युत्थाप्य सद्योजातमि
ति पंचानुवाकैः देवालयं प्रविश्य मणिमुक्तामवालसुवर्णरज

तानिगर्तमध्ये स्थापयित्वा ॥ नमस्तेरुद्रमन्यवइति मंत्रेण लिंगं
स्थापयेत् ॥ लिंगदृष्टिकरणार्थं अष्टगंधादि दद्यात् ॥ अ
थगंधादीन्याकारोन्मुखानि वृत्वा आघ्राय आवाहनं कुर्या
त् ॥ ॐ भूः पुरुषमावाहयामि ॥ भुवः पुरुषमावाहयामि ॥ ॐ
स्वः पुरुषमा० ॥ ॐ भूर्भुवस्वः पुरुषमावाहयामि ॥ ततो देवं स्पृष्ट्वा
ध्रुवसूक्तं जपेत् ॥ ॐ इहैवैधि मापच्योष्ठाः पर्वतइवाविचाचलिः
इंद्रेहेवेह ध्रुवस्तिष्ठह राष्ट्रमुधारय ॥ इममिंद्रो अदीधरध्रुवं ध्रुवे

णैहविषा ॥ तस्मै सोमो अधिब्रवत्तस्मा उ ब्रह्मणस्पतिः ॥ ध्रुवा द्यौर्ध्रु
वा पृथिवी ध्रुवासः पर्वता इमे ॥ ध्रुवं विश्वमिदं जगत् ध्रुवो राजा वि
शामयं ॥ ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः ॥ ध्रुवं त इंद्रश्चा
ग्निश्च राष्ट्रं धारयतां ध्रुवं ॥ ध्रुवं ध्रुवेण हविषाभि सोमं मृशामसि ॥
अथो त इंद्रः केवलीर्विशो बलिहृतस्करत् ॥ इलिपिजत्वा ॥ प्रणवे
न देवे षडंगन्यासं कृत्वा ॥ भूतशुद्धिं प्राणप्रतिष्ठां च कुर्यात् ॥
तद्यथा ॥ अस्य श्री प्राणप्रतिष्ठामंत्रस्य ॥ ब्रह्मविष्णुमहेश्वरा ऋष

यः॥ ऋग्यजुः सामाथर्वणिच्छंदांसि॥ क्रियाभववपुप्राणाख्या
देवता॥ आं बीजं॥ ह्रीं शक्तिः॥ क्रों कीलकं॥ अस्यां मूर्तौमाणप्र०॥
ॐ अं कं खं गं घं ङं० आं पृथिव्याप्तेजोवाय्वाकाशात्मने अंगुष्ठाभ्यां
नमः॥ इं चं छं जं झं ञं ईं शब्दस्पर्शरूपरसगंधात्मने तर्जनी०॥ उं
टं ठं डं ढं णं ऊं श्रोत्रत्वक्चक्षुजिह्वाघ्राणात्मने० मध्यमा०॥ ॐ एं तं थं दं
धं नं ऐं वाक्पाणिपादपायूपस्थात्मने अनामिका०॥ ॐ ओं पं फं बं
भं मं औं वचनादानमानविसर्गानंदात्मने कनिष्ठिका०॥ ॐ अं यं

रं लं वं शं षं सं हं ळं क्षं अः मनोबुध्यहंकारचित्तचैतन्यात्मने करत
लकरपृष्ठा०॥ एवं हृदयादि॥ अथ ध्यानं॥ रक्तांभोधिस्थपोतोल्लस
दरुणसरोजाधिरूढा कराब्जैः पाशं कोदंडमिक्षूद्भवगुणमथमप्यं
कुशं पंचबाणान्॥ बिभ्राणासृक्कपालं त्रिनयनलसिता पीनव
क्षोरुहाढ्या देवी बालार्कवर्णा भवसुखकरी प्राणशक्तिः परा
नः॥ इति ध्यात्वा॥ हृदि स्तं निध्याय॥ ॐ आं ह्रीं क्रों ॐ यं रं लं वं शं षं
सं हं ळं क्षं हंसः सोहं मम शिवलिंगे प्राणा इह प्राणाः॥ ॐ आं ह्रीं क्रों ॐ

लिं० अंयंरंलंवंशंषंसंहंळंक्षंहं सःसोऽहं मम शिवस्य जीव इह लिंगे स्थितः॥ ॐ अ०
११ आं ह्रीं क्रौं ॐ अं यं रं लं वं शं षं सं हं ळं क्षं अः हं सः सोऽहं मम शिवस्य स
र्वेंद्रियाणि वाङ्० मनः त्वक् चक्षुश्रोत्र जिह्वा घ्राण पाद पायूपस्थ
प्राणाः इह लिंगे आगत्य सुखं चिरं तिष्ठंतु स्वाहा॥ एवं त्रिः कुर्यात्॥
अस्यै प्राणाः प्रतिष्ठंतु अस्यै प्राणाः क्षरंतु च॥ अस्यै देवत्वमर्च्यायै मा
महेति च कश्चन॥ ॐ असुनीते पु० स्वस्ति॥ इति सजीवं ध्यायेत्॥ ततो
देवस्य दक्षिणकर्णे प्रणवव्याहृतियुक्तां गायत्रीं जपेद्यजमानः॥
११

ततः प्रार्थयेत्॥ स्वागतं देवदेवेश मद्भाग्यात्त्वमिहागतः॥ सान्निध्यं
सर्वदा देव लिंगेऽस्मिन् परिकल्पय॥ इति॥ आचार्यः अवशिष्ट कलश
चतुष्टयमानीय तेष्वेकस्मिन् रत्नानि निक्षिप्य तेन रत्नोदकेनाभि
षिंचति॥ प्रणवेन कूर्चासनं दत्वा गंधं दद्यात्॥ दूर्वा विष्णुक्रांतश्या
माकपद्मपत्रमिश्रोदकेन पाद्यं दद्यात्॥ इमा आपः शिवाः शिवतमा
पूताः पूततमा मेध्या मेध्यतमा अमृता अमृतरसाः पाद्या स्तां जुषं
तां प्रतिगृह्यतां प्रतिगृह्णातु भगवान् महादेवो रुद्रावे नमो नमः॥
^ य

इतिपाद्यं॥ इमाआपःशिवाःशिव॰ मेध्यनमाःअर्घ्यास्ताजुषंतांप्रति
गृह्यतांप्रतिगृण्हातु॰ वै नमोनमः॥ आपःक्षीरकुशाग्रअक्षतयवतिल
दूर्वामिश्रकलशोदकेनार्घ्यं॥ इमाआप॰ अमृतरसाःआचमनीयाः
स्ताजुषंतांप्रतिगृह्यतांप्र॰ नमः॥ एलालवंगकंकोलकर्पूरमिश्रो
दकेनाचमनीयं॥ पंचामृतैःपंचामृतस्नानं॥ इमाआपः॰ अमृतर
सास्नानीयास्ताजुषंतांप्रतिगृ॰ नमोनमः॥ इतिशुद्धोदकेनसंस्ना
प्य॥ पुनःस्नाश्रीमाचमनीयंदत्वा॥ युवंवस्त्राणीतिवस्त्रं॥ आचमनी॰

यज्ञोपवीतंपरमं॰ तेजः॥ इतियज्ञोपवीतंसमर्प्य॥ पुनराचमनीयं॰
नमोअस्तुनीलग्रीवाय॰ करंनमः॥ प्रविसरसूत्रविमुच्यनमस्कृ
त्य॰॥ इमेगंधाःशुभादिव्याःसर्वगंधैरलंकृताः॥ पूताब्रह्मपवि
त्रेणपूताःसूर्यस्यरश्मिभिः॥ प्रतिगृह्यतांप्रति॰ नमोनमः॥ इति
गंधंदत्वा॥ अक्षतान्समर्प्य॥ इमेमाल्याःशुभादिव्याःसर्वपुष्पै
रलंकृताः॥ पूताब्रह्मपवित्रेणपूताःसूर्यस्यरश्मिभिः॥ इतिपुष्पा
णिसमर्प्य॥ वनस्पतिरसोद्भूतोगंधाढ्योगंधउत्तमः॥ आघ्रेयः

लिं० प्र०

१३ सर्वदेवानां धूपोयं प्रतिगृह्यतां ॥ नमइति धूपं ॥ ज्योतिरुद्रश्चतेज
श्च देवानां सततं प्रियं ॥ प्रभाकरस्सुभूतानां दीपोयं प्रतिगृह्यतां प्र
ति० वेनमो नमइति दीपं ॥ परमान्नेन गुडोदनेन नानाभक्ष्योपहारे
श्च नैवेद्यं० पवित्रं निवितं० मारान ॥ इति प्रोक्ष्य नैवेद्यं समर्प्य पुनरा
चमनीयं दात्वा ॥ करोद्वर्तनार्थं गंधं दत्वा ॥ इदं फलमिति फलं ॥
पूगीफलं महद्दिव्यं० तांबूलं ॥ हिरण्यभैगति दक्षिणां ॥ ततो नीरा
जनं कर्पूरदीपं सौदे ॥ पुष्पाणि समर्पयेत् ॥ भवाय देवाय नमः ॥ श

१२

र्वाय देवाय० ईशानाय देवाय० पशुपतेर्देवाय० रुद्राय देवाय० उग्राय
देवाय० भीमाय देवाय० महते देवाय नमः ॥ इति पुष्पांजलिं दत्वा ए
भिरेव तर्पयेत् ॥ भवं देवं तर्पयामि ॥ शर्वं देवं० ईशानं देवं त० पशुप
तिं देवं० रुद्रं देवं त० उग्रं देवं त० भीमं देवं त० महांतं देवं तर्पयामि ॥
ततो मंत्रहीनं क्रिया० ॥ आवाहनं न जानामि० ॥ अन्यथा शरणं० ॥
इति क्षमापयेत् ॥ ततोग्नेः पश्चादुपविश्य ॥ तिलोदनं जुहुयात् ॥ ॐ
भवाय देवाय नमः स्वाहा ॥ शर्वाय देवाय नमः स्वाहा ॥ पशुपतये देवा० ॥
ईशानाय देवाय०

हिं०
१४

प्र०

रुद्राय देवाय०॥ उग्राय देवाय० भीमाय देवाय० महते देवाय नमस्वा
हा॥ इत्यष्टभिर्हुत्वा॥ ततो गुडोदनेन॥ भवस्य देवस्य पत्न्यै नमस्वाहा॥
शर्वस्य देवस्य प०॥ ईशानस्य देवस्य प०॥ पशुपतेर्देवस्य प० रुद्र
स्य देवस्य प०॥ उग्रस्य देवस्य प० भीमस्य देवस्य प०॥ महतेर्देवस्य प०
इत्यष्टभिर्हुत्वा॥ ततो हरिद्रोदनेन॥ भवस्य देवस्य सुताय नमस्वहा
शर्वस्य देवस्य सु०॥ ईशानस्य देवस्य सु०॥ पशुपतेर्देवस्य सु०॥ रुद्र
स्य देवस्य सु०॥ उग्रस्य देवस्य सु०॥ भीमस्य देवस्य सु० महतेर्देवस्य सु०

१४

त्रिणि हवींष्येकीकृत्वा जुहुयात्॥ त्र्यंबकं०॥ मानो महांतमु०॥ मा
नस्तोके०॥ आरात्ते गोघ्न०॥ विकिरिद्र वि०॥ सहस्राणि सहस्रशो०॥
इति षडाहुतीर्हुत्वा॥ नाममंत्रेण जुहुयात्॥ शिवाय नमः स्वहा॥
शंकराय न०॥ सहमानाय०॥ शितिकंठाय०॥ कपर्दिने न०॥ ताम्रा
य०॥ अरुणाय०॥ अपगुरणाय०॥ हिरण्यबाहवे०॥ सस्पिंजराय०
बभ्लुशाय०॥ हिरण्याय०॥ इति हुत्वा॥ ततः स्विष्टकृदादिहोमशेषं
समाप्य॥ हविःशेषेण बलिर्देयः॥ तामेकमाद्यं पुरुषं पुरातनं रुद्र

लिं० प्र०

१५ शिवं विश्वसृजं यजामहे ॥ त्वमेव यज्ञो विहितो विधेयस्त्वमात्मनात्म
प्रतिगृह्णीष्व हव्यं ॥ भूर्भुवस्स्वरोमिति त्रिरुक्त्वा बलिमुपहरेत् ॥ ततो ह
स्तपादं प्रक्षाल्याचम्य ॥ अग्ने नयः सुपथेति प्रदक्षिणां कृत्वा ॥ विश्व
भुजे नमः ॥ सर्वभुजे नमः ॥ आत्मने नमः ॥ परमात्मने नमः ॥ इति न
मस्कृत्य ॥ लिंगप्रतिष्ठासिध्यर्थं द्वादश यथाशक्ति वा ब्राह्मणभोज
नं संकल्प्य ॥ यजमानो देवं प्रणिपत्य प्रार्थयेत् ॥ यावच्चंद्रावनीसू
र्यौस्तिष्ठंत्यप्रतिघातिनः ॥ तावत्त्वयात्र देवेश स्थेयं भक्त्यानुकंपया ॥

१५

ततो नामकरणं कृत्वा ॥ तन्नाम्ना देवस्य उचर पूजां कुर्यात् ॥ कृतस्य
लिंगप्रतिष्ठाकर्मणः सांगतार्थं तत्संपूर्णफलावाप्त्यर्थं आचार्या
दीन्पूजयिष्ये ॥ तेभ्यो दक्षिणादानं करिष्ये ॥ आचार्यं गंधवस्त्रालंका
रशय्या गोभूमिवाहनादिभिः संतोषयेत् ॥ ब्रह्मणे ऋषभं ॥ सदस्या
याश्वं ॥ ऋत्विग्भ्यो गां दद्यात् ॥ आचार्याय कलशादिं संकल्प्य विसृ
ज्य दद्यात् ॥ आचार्यः गच्छ गच्छेति अग्निं विसृज्य न्यूनातिरिक्तफल
सिध्यर्थं अन्यद्ब्राह्मणभोजनं भूयसीं संकल्प्य कर्मेश्वरार्पणं कुर्यात् ॥

लिं०
१८

प्र०

विष्णुस्मरणं॥ यस्य स्मृत्वा०॥ अनेन मया कृतेन लिंगप्रतिष्ठाख्येन क
र्मणा तेन श्रीपरमेश्वरः प्रीयतां॥ प्रायश्चित्ता० ब्राह्मणान्प्रणिपापसक
र्मसमाप्ति वाचयीत॥ इति बौधायनोक्त लिंगप्रतिष्ठाविधिः॥ ॥
हस्ताक्षर गोविंद शास्त्री अणे स्वार्थं परोपकारार्थं च लिख्यते॥

सामग्री॥ पंचसूत्रलक्षणनिर्मितं लिंगं॥ अष्टगंधः॥ पंचवल्कलाः॥
पंचपल्लवाः॥ सप्तमृदः॥ समित्॥ कुश। शमी। खदिर। बिल्व। पनस॥
श्यामाक। पद्मपत्र। विष्णुक्रांता। पलाशपर्ण। अश्वत्थ। वट। आम्र॥
बिकंकत। शिरीष॥ दूर्वा। एला। लवंग। नारिकेल॥ सुपारि। मधु॥
तैलसपात्र। सुवर्णशलाका। दर्पण। सर्षप। पुष्पाणि। पुष्पमाला॥ व
स्त्राणि। उपवीत। सूत्र। पंचगव्यं। पंचामृतं। फलानि। कलश। ओदन॥
घृत। तांबूल। यव। तिल। तंडुल। हरिद्रा। गुड। पंचरत्नानि। नानाभ
क्ष्यनैवेद्यः॥ दीपाः धूप। दीप। कर्पूर। तैलसुगंधी। अष्टगंधप्रवक्ष्यामी

दैवलानां प्रतिष्ठवे ॥ मध्युच्छिष्टं गुडं लाक्षां गुग्गुलाः श्रीवेष्ट इरीतकी ॥ कु
रुं गासर्जनिर्यासं तैलं चैतानि निश्रयेत् ॥ सप्तभागानि निष्पीष्य लो
हपत्रिपक्वेष्टनैः ॥ लेहं पाकं ततः कृत्वा स्नालं कायां विनिक्षिपेत् ॥ पं
चरत्नानि निक्षिप्य पश्चाद्देवं न्यसेद्बुधः ॥ कुरुंदः पाषाणः ॥ सालइति
निर्यासः ॥ सर्जवृक्षस्य ॥

```
[OrderDescription]
,CREATED=28.08.19 10:34
,TRANSFERRED=2019/08/28 at 10:38:44
,PAGES=19
,TYPE=STD
,NAME=S0001563
,Book Name=M-777-LING PRATISHTHA VIDHI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,
```